श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# શ્રી મદ્ભાગવત રસિક કુટુંબ

## UG-11.21 - ચતુર્થ સોપાન



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઝ્) ચૈવ નરોત્તમમ્.**

**દેવીં(મ્) સરસ્વતીં(વઁ) વ્યાસં(ન્), તતો જયમુદીરયેત્.**

**નામસઙ્કીર્તનં(યઁ) યસ્ય, સર્વપાપપ્રણાશનમ્.**

**પ્રણામો દુઃખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.**

**શ્રીમદ્ભાગવતમહાપુરાણમ્**

**એકાદશઃ સ્કન્ધઃ**

**.. અથૈકવિં(મ્)શોઽધ્યાયઃ ..**

**શ્રીભગવાનુવાચ**

**ય એતાન્ મત્પથો હિત્વા, ભક્તિજ્ઞાનક્રિયાત્મકાન્ .**

**ક્ષુદ્રાન્ કામાં(મ્)શ્ચલૈઃ(ફ્) પ્રાણૈર્-જુષન્તઃ(સ્) સં(મ્)સરન્તિ તે .. ૧..**

ભક્તિજ્ઞા + નક્રિયાત્ + મકાન્

**સ્વે સ્વેઽધિકારે યા નિષ્ઠા, સ ગુણઃ(ફ્) પરિકીર્તિતઃ .**

**વિપર્યયસ્તુ દોષઃ(સ્) સ્યા-દુભયોરેષ નિશ્ચયઃ .. ૨..**

વિપર્ + યયસ્તુ , દુભયો + રેષ

**શુદ્ધ્યશુદ્ધી વિધીયેતે, સમાનેષ્વપિ વસ્તુષુ .**

**દ્રવ્યસ્ય વિચિકિત્સાર્થં(ઙ્), ગુણદોષૌ શુભાશુભૌ .. ૩..**

સમાનેષ્ + વપિ ,વિચિકિત્ + સાર્થં(ઙ્)

ધર્માર્થં(વઁ) વ્યવહારાર્થં(યઁ), યાત્રાર્થમિતિ ચાનઘ .

દર્શિતોઽયં(મ્) મયાઽઽચારો, ધર્મમુંદ્વહતાં(ન્) ધુરમ્ .. ૪..

યાત્રાર્થ + મિતિ, ધર્મમુદ્ + વહતાં(ન્)

ભૂમ્યમ્બ્વગ્ન્યનિલાકાશા, ભૂતાનાં(મ્) પં(ઞ્)ચ ધાતવઃ .

આબ્રહ્મસ્થાવરાદીનાં(મ્), શારીરા આત્મસં(યઁ)યુતાઃ .. ૫..

ભૂમ્યમ્ + બ્વગ્ન્ય + નિલા + કાશા , આબ્રહ્મસ્થા + વરા + દીનાં(મ્)

વેદેન નામરૂપાણિ, વિષમાણિ સમેષ્વપિ .

ધાતુષૂદ્ધવ કલ્પ્યન્તે, એતેષાં(મ્) સ્વાર્થસિદ્ધયે .. ૬..

ધાતુષૂદ્ + ધવ

દેશકાલાદિભાવાનાં(વઁ), વસ્તૂનાં(મ્) મમ સત્તમ .

ગુણદોષૌ વિધીયેતે, નિયમાર્થં(મ્) હિ કર્મણામ્ .. ૭..

દેશકાલા + દિભાવાનાં(વઁ)

અકૃષ્ણસારો દેશાના-મબ્રહ્મણ્યોઽશુચિર્ભવેત્ .

કૃષ્ણસારોઽપ્યસૌવીર-કીકટાસં(મ્)સ્કૃતેરિણમ્ .. ૮..

મબ્રહ્મણ્યોઽ + શુચિર્ + ભવેત્ , કૃષ્ણ + સારોઽપ્ય + સૌવીર

કીકટા + સં(મ્)સ્કૃતે + રિણમ્

કર્મણ્યો ગુણવાન્ કાલો, દ્રવ્યતઃ(સ્) સ્વત એવ વા .

યતો નિવર્તતે કર્મ, સ દોષોઽકર્મકઃ(સ્) સ્મૃતઃ .. ૯..

દોષોઽ + કર્મકઃ(સ્)

દ્રવ્યસ્ય શુદ્ધ્યશુદ્ધી ચ, દ્રવ્યેણ વચનેન ચ .

સં(મ્)સ્કારેણાથ કાલેન, મહત્વાલ્પતયાથવા .. ૧૦..

શુદ્ધ્ય + શુદ્ધી, સં(મ્)સ્કા + રેણાથ , મહત્વાલ્ + પત + યાથવા

શક્ત્યાશક્ત્યાથવા બુદ્ધ્યા, સમૃદ્ધ્યા ચ યદાત્મને .

અઘં(ઙ્) કુર્વન્તિ હિ યથા, દેશાવસ્થાનુસારતઃ .. ૧૧..

શક્ત્યા + શક્ત્યા + થવા, દેશા + વસ્થા + નુસારતઃ

ધાન્યદાર્*વસ્થિત*ન્તૂનાં(મ્), રસતૈજસચર્મણામ્ .

કાલવાય્*વગ્નિમૃત્તોયૈઃ(ફ્), પાર્થિવાનાં(યૂઁ) યુતાયુતૈઃ .. ૧૨..

ધાન્યદાર્ + વસ્થિતન્ + તૂનાં(મ્), રસતૈ + જસચર્ + મણામ્

કાલવાય્ + વગ્નિ + મૃત્તોયૈઃ(ફ્)

અમેધ્ય*લિપ્તં(યૂઁ) *યદ્ યેન, *ગન્ધં(લૂઁ) લેપં(વૂઁ) વ્યપોહતિ .

ભજ*તે પ્રકૃતિં(ન્) *તસ્ય, *તચ્છૌચં(ન્) તાવદિ*ષ્યતે .. ૧૩..

અમેધ્ય + લિપ્તં(યૂઁ)

સ્નાનદાનતપોઽ*વસ્થા- વીર્યસં(મ્)સ્કારકર્મભિઃ .

મત્*સ્મૃત્યા ચાત્મનઃ(શ્) શૌચં(મ્), *શુધ્ધઃ(ખ્) કર્માચરેદ્ દ્વિજઃ .. ૧૪..

સ્ના + નદા + નતપોઽ + વસ્થા, વીર્ય + સં(મ્)સ્કા + રકર્મભિઃ

મન્*ત્રસ્ય ચ પરિ*જ્ઞાનં(ઙ્), કર્મ*શુધ્ધિર્મદર્પણમ્ .

ધર્મઃ(સ્) *સમ્*પદ્યતે *ષડ્ભિ-રધ*ર્મસ્તુ વિપર્યયઃ .. ૧૫..

કર્મશુધ્ધિર્ + મદર્પણમ્

ક્વચિદ્ ગુણોઽપિ દોષઃ(સ્) સ્યાદ્-દોષોઽપિ વિધિના ગુણઃ .

ગુણદોષાર્થનિયમ*સ્ - *તદ્ભિદામેવ બાધતે .. ૧૬..

ગુણ + દોષાર્થ + નિયમસ્ , તદ્ + ભિદા + મેવ

સમાનકર્માચરણં(મ્), પતિતાનાં(ન્) ન પાતકમ્ .

ઔત્પત્તિકો ગુણઃ(સ્) સં(ઙ્)ગો, ન શયાનઃ(ફ્) પ*તત્યધઃ .. ૧૭..

સમા + નકર્મા + ચરણં(મ્)

યતો યતો નિવર્તેત, વિ*મુચ્યેત ત*તસ્તતઃ .

એષ ધર્મો નૃણાં(ઙ્) ક્ષેમઃ(શ્), શોકમોહભયાપહઃ .. ૧૮..

શોકમોહ + ભયાપહઃ

વિષયેષુ ગુણાધ્યાસાત્ - પું(મ્)સઃ(સ્) સં(ઙ્)*ગસ્તતો ભવેત્ .

સં(ઙ્)ગા*ત્તત્ર ભવેત્ કામઃ(ખ્), કામાદેવ કલિર્નૃણામ્ .. ૧૯..

ગુણા + ધ્યાસાત્ , સં(ઙ્)ગાત્ + તત્ર

કલેર્દુર્વિષહઃ(ખ્) ક્રોધસ્- તમસ્તમનુવર્તતે .

તમસા ગ્રસ્યતે પું(મ્)સશ્ - ચેતના વ્યાપિની દ્રુતમ્ .. ૨૦..

કલેર્ + દુર્ + વિષહઃ(ખ્), તમસ્ + તમનુ + વર્તતે

તયા વિરહિતઃ(સ્) સાધો, જન્તુઃ(શ્) શૂન્યાય કલ્પતે .

તતોઽસ્ય સ્વાર્થવિભ્રં(મ્)શો, મૂર્ચ્છિતસ્ય મૃતસ્ય ચ .. ૨૧..

સ્વાર્થ + વિભ્રં(મ્)શો

વિષયાભિનિવેશેન, નાત્માનં(વ્ઁ) વેદ નાપરમ્ .

વૃક્ષજીવિકયા જીવન્, વ્યર્થં(મ્) ભસ્ત્રેવ યઃ(શ્) શ્વસન્ .. ૨૨..

વિષયા + ભિનિવે + શેન , વૃક્ષજી + વિકયા

ફલશ્રુતિરિયં(ન્) નૃણાં(ન્), ન શ્રેયો રોચનં(મ્) પરમ્ .

શ્રેયોવિવક્ષયા પ્રોક્તં(યઁ), યથા ભૈષજ્યરોચનમ્ .. ૨૩..

ફલ + શ્રુતિરિયં(ન્), શ્રેયો + વિવક્ષયા ,

ભૈષજ્ + યરોચનમ્

ઉત્પત્ત્યૈવ હિ કામેષુ, પ્રાણેષુ સ્વજનેષુ ચ .

આસક્તમનસો મર્ત્યા, આત્મનોઽનર્થહેતુષુ .. ૨૪..

ઉત્પત્ + ત્યૈવ, આસક્ત + મનસો,

આત્મનોઽ + નર્થ + હેતુષુ

ન તાનવિદુષઃ(સ્) સ્વાર્થં(મ્), ભ્રામ્યતો વૃજિનાધ્વનિ .

કથં(યઁ) યુઞ્જ્યાત્ પુનસ્તેષુ, તાં(મ્)સ્તમો વિશતો બુધઃ .. ૨૫..

વૃજિના + ધ્વનિ

એવં(વ્ઁ) વ્યવસિતં(ઙ્) કેચિ-દવિજ્ઞાય કુબુદ્ધયઃ .

ફલશ્રુતિં(ઙ્) કુસુમિતાં(ન્), ન વેદજ્ઞા વદન્તિ હિ .. ૨૬..

કામિનઃ(ખ્) કૃપણા લુબ્ધાઃ(ફ્), પુષ્પેષુ ફલબુદ્ધયઃ .

અગ્નિમુગ્ધા ધૂમતાન્તાઃ(સ્) સ્વં(લ્ઁ) લોકં(ન્) ન વિદન્તિ તે .. ૨૭..

ન તે મામં(ઙ્)ગ જાનન્તિ, હૃદિસ્થં(યઁ) ય ઇદં(યઁ) યતઃ .

ઉક્થશસ્ત્રા હ્યસુતૃપો, યથા નીહારચક્ષુષઃ .. ૨૮..

નીહા + રચક્ષુષઃ

તે મે મતમવિજ્ઞાય, પરોક્ષં(વઁ) વિષયાત્મકાઃ .

હિં(મ્)સાયાં(યઁ) યદિ રાગઃ(સ્) સ્યાદ્, યજ્ઞ એવ ન ચોદના .. ૨૯..

મત + મવિજ્ઞાય

હિં(મ્)સાવિહારા હ્યાલબ્ધૈઃ(ફ્), પશુભિઃ(સ્)  સ્વસુખેચ્છયા .

યજન્તે દેવતા યજ્ઞૈઃ(ફ્), પિતૃભૂતપતીન્ ખલાઃ .. ૩૦..

સ્વસુખેચ્ + છયા, પિતૃભૂ + તપતીન્

સ્વપ્નોપમમમું(લઁ) લોક - મસન્તં(મ્) શ્રવણપ્રિયમ્ .

આશિષો હૃદિ સં(ઙ્)કલ્પ્ય, ત્યજન્ત્યર્થાન્ યથા વણિક્ .. ૩૧..

સ્વપ્નો + પમ + મમું(લઁ), ત્યજન્ + ત્યર્થાન્

રજઃ(સ્)સત્ત્વતમોનિષ્ઠા, રજઃ(સ્)સત્ત્વતમોજુષઃ .

ઉપાસત ઇન્દ્રમુખ્યાન્, દેવાદીન્ ન તથૈવ મામ્ .. ૩૨..

રજઃ(સ્)સત્ત્વ + તમોનિષ્ઠા, રજઃ(સ્)સત્ત્વ + તમોજુષઃ

ઇષ્ટ્વેહ દેવતા યજ્ઞૈર્ - ગત્વા રં(મ્)સ્યામહે દિવિ .

તસ્યાન્ત ઇહ ભૂયાસ્મ, મહાશાલા મહાકુલાઃ .. ૩૩..

એવં(મ્) પુષ્પિતયા વાચા, વ્યાક્ષિપ્તમનસાં(ન્) નૃણામ્ .

માનિનાં(ઞ્) ચાતિસ્તબ્ધાનાં(મ્), મદ્વાર્તાપિ ન રોચતે .. ૩૪..

વ્યાક્ષિપ્ + તમનસાં(ન્),ચાતિસ્ + તબ્ધાનાં(મ્)

વેદા બ્રહ્માત્મવિષયાસ્ - ત્રિકાણ્ડવિષયા ઇમે .

પરોક્ષવાદા ઋષયઃ(ફ્), પરોક્ષં(મ્) મમ ચ પ્રિયમ્ .. ૩૫..

બ્રહ્માત્ + મવિષયાસ્

શબ્દબ્રહ્મ સુદુર્બોધં(મ્), પ્રાણેન્દ્રિયમનોમયમ્ .

અનન્તપારં(ઙ્) ગમ્ભીરં(ન્), દુર્વિગાહ્યં(મ્) સમુદ્રવત્ .. ૩૬..

પ્રાણેન્દ્રિય + મનો + મયમ્

મયોપબૃં(મ્)હિતં(મ્) ભૂમ્ના, બ્રહ્મણાનન્તશક્તિના .

ભૂતેષુ ઘોષરૂપેણ, બિસેષૂર્ણેવ લક્ષ્યતે .. ૩૭..

મયો + પબૃં(મ્) + હિતં(મ્), બ્રહ્મણા + નન્ત + શક્તિના

યથોર્ણનાભિર્હૃદયા-દૂર્ણામુદ્વમતે મુખાત્ .

આકાશાદ્ ઘોષવાન્ પ્રાણો, મનસા સ્પર્શરૂપિણા .. ૩૮..

યથોર્ + ણનાભિર્ + હૃદયા, દૂર્ણા + મુદ્ + વમતે

છન્દોમયોઽમૃતમયઃ(સ્), સહસ્રપદવીં(મ્) પ્રભુઃ .

ઓં(ઙ્)કારાદ્ વ્યં(ઞ્) જિતસ્પર્શસ્ - વરોષ્માન્તઃ(સ્)સ્થભૂષિતામ્ .. ૩૯..

છન્દોમયોઽ + મૃતમયઃ(સ્), વ્યં(ઞ્)જિતસ્ + પર્શસ્

વિચિત્રભાષાવિતતાં(ઞ્) છન્દોભિશ્ચતુરુત્તરૈઃ .

અનન્તપારાં(મ્) બૃહતીં(મ્), સૃજત્યાક્ષિપતે સ્વયમ્ .. ૪૦..

વિચિત્ર + ભાષા + વિતતાં(ઞ્) ,છન્દોભિશ્ + ચતુરુત્ + તરૈઃ, સૃજત્યા + ક્ષિપતે

ગાયત્ર્યુષ્ણિગનુષ્ટુપ્ ચ, બૃહતી પઙ્ક્તિરેવ ચ .

ત્રિષ્ટુબ્જગત્યતિચ્છન્દો, હ્યત્યષ્ટ્યતિજગદ્ વિરાટ્ .. ૪૧..

ગાયત્ર્યુષ્ + ણિગનુષ્ + ટુપ્ ,ત્રિષ્ટુબ્ + જગત્ + યતિચ્ + છન્દો, હ્યત્યષ્ + ટ્યતિ + જગદ્

કિં(વ્ઁ) વિધત્તે કિમાચષ્ટે, કિમનૂદ્ય વિકલ્પયેત્ .

ઇત્યસ્યા હૃદયં(લ્ઁ) લોકે, નાન્યો મદ્ વેદ કશ્ચન .. ૪૨..

માં(વ્ઁ) વિધત્તેઽભિધત્તે માં(વ્ઁ), વિકલ્પ્યાપોહ્યતે ત્વહમ્ .

એતાવાન્ સર્વવેદાર્થઃ(શ્), શબ્દ આસ્થાય માં(મ્) ભિદામ્ .

માયામાત્રમનૂદ્યાન્તે, પ્રતિષિધ્ય પ્રસીદતિ .. ૪૩..

વિકલ્પ્યા + પોહ્યતે, માયામાત્ર + મનૂ + દ્યાન્તે

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહં(મ્)સ્યાં(મ્) સં(મ્)હિતાયામેકાદશસ્કન્ધે એકવિં(મ્)શોડધ્યાયઃ .. ૨૧..

ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે.
ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ

